# Maa Tara Sahasranama Stotram

# तकारादि श्रीतारा सहस्रनाम स्तोत्रम्



**GURUDEV RAJ VERMA**

**Contact-** +91-9897507933**,** +91-7500292413(WhatsApp No.)

**Email-** mahakalshakti@gmail.com

**For more info visit---**

www.scribd.com/mahakalshakti

www.gurudevrajverma.com

महाशक्ति काली को महाप्रलय की अधिष्ठात्री देवी के रूप में जाना जाता है, उन्हीं का द्वितीय स्वरूप महाविद्या तारा, काली के समान ही सुफलदायिनी है। साक्षात् शिव भी इस शक्ति के बिना शव के समान है। ब्रह्मा, विष्णु एवं इन्द्रादि देवताओं ने भी तारा उपासना से लाभार्जित किया है। महाकाली का प्रलयकारक स्वरूप, तारा की तंत्रोक्त साधना अत्यन्त गोपनीय, दुर्लभ एवं गुरुगम्य है। जिसको समर्थ गुरु के मार्गदर्शन में करने से मनुष्य समस्त दुर्लभ वस्तुओं को अर्जित कर लेता है। भगवती तारा की प्रसन्नता हेतु सहस्रनाम का नियतिम श्रवण अथवा पठन सबसे उत्तम विधान है। इसके प्रभाव से मनुष्य सभी पापों एवं दुःखों का विनाश कर महासौभाग्य को सिद्ध कर लेता है। अतः तारा साधकों को नित्य पूजन में इस पुण्यकारक एवं पवित्र नामों का पठन अवश्य करना चाहिये। ब्रह्मयामलतंत्र में इसकी महिमा के विषय में कहा गया है कि यदि साधक श्रद्धा एवं विधिपूर्वक इस स्तोत्र के एक लाख बार पाठ कर ले तो वह पवित्र साधक तारा के साक्षात् दर्शन कर लेता है। एकलिंग के



Shri Raj verma ji
09897507933, 07500292413

समीप, सिद्धपीठ, श्मशान अथवा निर्जन स्थान में आरम्भिक पूजार्चना करने के पश्चात् महाशक्ति तारा की उपासना करें। आवश्यक कर्म गुरुमुख से प्राप्त करें।

### श्रीवशिष्ठ उवाच-

नाम्नां सहस्रं ताराया मुखाम्भोजाद्विनिर्गतम्।
मंत्रसिद्धिकरं प्रोक्तं तन्मेवद पितामह।।

### ब्रह्मोवाच-

श्रृणु वत्स! प्रवक्ष्यामि रहस्यं सर्वसिद्धिदम्।
यस्योपदेशमात्रेण तव सिद्धिर्भविष्यति।।
महाप्रलयकालादौ नष्टे स्थावरजंगमे।
महातारं समाकर्ण्य कृपया संहृतं तनौ।।
नाम्ना तेन महातारा ख्याता सा ब्रह्मरूपिणी।
महाशूलत्रयं कृत्वा तत्र चैकाकिनी स्थिता।।
पुनः सृष्टेश्चिकीर्षाऽभूद्दिव्य साम्राज्य संज्ञकम्।
नाम्नां सहस्रमस्यास्तु तकाराद्यं मया स्मृतम्।।



Shri Raj verma ji
09897507933, 07500292413

तत्प्रभावेण ब्रह्माण्डं निर्मितं सुदृढं महत्।

आविर्भूता वयं तंत्रयंत्रैस्तस्याः पुरा द्विजः।।

स्वस्यकार्यार्थिनस्तत्र भ्रान्ता भूम्यां यथा वयम्।

तयोपदिष्टाः कृपया भवामस्सृष्टिकारकाः।।

तस्याः प्रसादाद्विप्रेन्द्रः त्रयो ब्रह्माण्डनायकाः।

अन्ये सुरगणाः सर्वे तस्याः पादप्रसेवकाः।।

पठनाद्धारणात्सृष्टेः कर्ताऽहं पालको हरिः।

तत्त्वाक्षरोपदेशेन संहर्ता शंकरः स्वयम्।।

ऋषिच्छन्दादिकं ध्यानं मूलवत्परिकीर्तितम्।

नियोगमात्रसिद्धौ च पुरुषार्थचतुष्टयम्।।

विनियोग- ॐ अस्य श्रीतारातकारादिसहस्रनाम स्तोत्रस्य वसिष्ठ ऋषिः, अनुष्टुप् छन्दः, श्रीतारा देवता, सर्वेष्ट सिद्धये पाठे विनियोगः।



Shri Raj verma ji
09897507933, 07500292413

**ऋष्यादिन्यास-** ॐ वसिष्ठ ऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। श्रीतारादेवतायै नमः हृदि। विनियोगाय नमः सर्वांगे।

## षडंगन्यास-

ॐ ह्रां ... अंगुष्ठाभ्यां नमः ... हृदयाय नमः।

ॐ ह्रीं ... तर्जनीभ्यां नमः ... शिरसे स्वाहा।

ॐ ह्रूं ... मध्माभ्यां नमः ... शिखायै वषट्।

ॐ ह्रैं ... अनामिकाभ्यां नमः ... कवचाय हुम्।

ॐ ह्रौं ... कनिष्ठिकाभ्यां नमः ... नेत्रत्रयाय वौषट्।

ॐ ह्रः ... करतलकरपृष्ठाभ्यां नमः ... अस्त्राय फट्।

## ध्यानम्-

प्रत्यालीढपदार्पितांघ्रि शवहृद-घोराट्टहासा परा,

खंगेन्दीवर कर्त्रिखर्परभुजा हुंकारबीजोद्भवा।

खर्वा नीलविशाल पिंगलजटाजूटैकनागैर्युता जाड्यं

न्यस्य कपालकर्तृ जगतां हन्त्युग्रतारा स्वयम्।।



Shri Raj verma ji
09897507933, 07500292413

## स्तोत्रम्-

तारा तारादिपंचार्णा तारान्यावेदवीर्यजा।

तारा तारहितावर्णा ताराद्याताररूपिणी।।

ताररात्रि समुत्पन्ना तारारात्रिवरोद्यता।

तारारात्रिजपासक्ता तारारात्रिस्वरूपिणी।।

ताराराज्ञीस्वसंतुष्टा ताराराज्ञीवरप्रदा।

ताराराज्ञीस्वरूपा च ताराराज्ञीप्रसिद्धिदा।।

ताराहृत्पंकजागारा ताराहृत्पंकजापरा।

ताराहृत्पंकजाधारा ताराहृत्पंकजातथा।।

तारेश्वरी च ताराभा तारागणस्वरूपिणी।

तारागणसमाकीर्णा तारागणनिषेविता।।

तारा तारान्विता तारारत्नान्वितविभूषणा।

तारागणरणासन्ना ताराकृत्यप्रपूजिता।।

तारागणकृताहारा तारागणकृताश्रया।

तारागणकृतागारा तारागणनतत्परा।।

तारागुणगणाकीर्णा तारागुणगणप्रदा।



Shri Raj verma ji
09897507933, 07500292413

ताराgुणगणासक्ता तारागुणगणालया।।

तारेश्वरी तारापूज्या ताराजप्या तु तारणा।

तारमुख्या तु ताराख्या तारदक्षा तु तारिणी।।

तारागम्या तु तारस्था तारामृत तरंगिणी।

तारभव्या तु तारार्णा तारहव्या तु तारिणी।।

तारका तारकांतस्था तारकाराशिभूषणा।

तारकाहारशोभाढ्या तारकावेष्टितांगणा।।

तारकाहंसकाकीर्णा तारकाकृतभूषणा।

तारकांगदशोभांगी तारकाश्रितकंकणा।।

तारकांचितकांची च तारकान्वितभक्षणा।

तारकाचित्रवसना तारकासनमण्डला।।

तारकाकीर्णमुकुटा तारकाश्रितकुण्डला।

तारकान्वित ताटंकयुग्मगण्डस्थलोज्जवला।।

तारकाश्रितपादाब्जा तारकावरदायिका।

तारकादत्तहृदया तारकांचितसायका।।

तारकान्यासकुशला तारकान्यासविग्रहा।



Shri Raj verma ji
09897507933, 07500292413

तारकान्याससंतुष्टा तारकान्याससिद्धिदा।।

तारकान्यासनिलया तारकान्यासपूजिता।

तारकान्याससंहृष्टा तारकान्याससिद्धिदा।।

तारकान्याससमग्ना तारकान्यासवासिनी।

तारकान्याससम्पूर्णा मंत्रसिद्धिविधायिनी।।

तारकोपासकप्राणा तारकोपासकप्रिया।

तारकोपासकासाध्या तारकोपासकेष्टदा।।

तारकोपासकासाक्ता तारकोपासकार्थिनी।

तारकोपासकाराध्या तारकोपासकाश्रया।।

तारकासुरसंतुष्टा तारकासुरपूजिता।

तारकासुरनिर्माणकर्त्री तारकवन्दिता।।

तारकासुरसम्मान्या तारकासुरमानदा।

तारकासुरसंसिद्धा तारकासुरदेवता।।

तारकासुरदेहस्था तारकासुरस्वर्गदा।

तारकासुरसंसृष्टा तारकासुरगर्वदा।।

तारकासुरसंहन्त्री तारकासुरमर्द्दिनी।



Shri Raj verma ji
09897507933, 07500292413

तारकासुरसंग्राममनर्तकी तारकापरा।।

तारकासुरसंग्राममतारिणी तारकारिभृत्।

तारकासुरसंग्रामक बंधवृन्दवन्दिता।।

तारकारिप्रसूस्तारकारिमाता तुकारिका।

तारकारिमनोहारि वस्त्रभूषानुशासिका।।

तारकारिविधात्री च तारकारिनिषेविता।

तारकारिवचस्तुष्टा तारकारिसुशिक्षिता।।

तारकारिसुसंतुष्टा तारकारिविभूषिता।

तारकारिकृतोत्संगा तारकारिप्रहर्षदा।।

तमःसम्पूर्णसर्वांगी तमोलिप्तकलेवरा।

तमोव्याप्तस्थलासंगा तमःपटलसन्निभा।।

तमोहन्त्री तमःकर्त्री तमःसंचारकारिणी।

तमोगात्री तमोदात्री तमःपात्री तमोऽपहा।।

तमोराशिस्तमोनाशा तमोराशि विनाशिनी।

तमोराशिकृतध्वंसी तमोराशिभयंकरी।।



Shri Raj verma ji
09897507933, 07500292413

तमोगुणप्रसन्नास्या तमोगुणसुसिद्धिदा।

तमोगुणोक्तमार्गस्था तमागुणविराजिता।।

तमोगुणस्तुतिपरा तमोगुणविवर्द्धिनी।

तमोगुणाश्रितपरा तमोगुणविनाशिनी।।

तमोगुणक्षयकरी तमोगुणकलेवरा।

तमोगुणध्वंसतुष्टा तमःपारे प्रतिष्ठिता।।

तमोभवभवप्रीता तमोभवभवप्रिया।

तमोभवभवश्रद्धा तमोभवभवाश्रया।।

तमोभवभवप्राणा तमोभवभवार्चिता।

तमोभवभवप्रीत्यालीढ कुम्भस्थलस्थिता।।

तपस्विवृन्दसंतुष्टा तपस्विवृन्दपुष्टिदा।

तपस्विवृन्दसंस्तुत्या तपस्विवृन्दवंदिता।।

तपस्विवृन्दसम्पन्ना तपस्विवृन्दहर्षदा।

तपस्विवृन्दसम्पूज्या तपस्विवृन्दभूषिता।।

तपस्विचित्ततलपस्था तपस्विचित्तमध्यगा।

तपस्विचित्तचित्तार्हा तपस्विचित्तहारिणी।।



Shri Raj verma ji
09897507933, 07500292413

तपस्विकल्पवल्लयाभा तपस्विकल्पपादपा।

तपस्विकामधेनुश्च तपस्विकामपूर्तिदा।।

तपस्वित्राणनिरता तपस्विगृहसंस्थिता।

तपस्विगृहराज्य श्रीस्तपस्विराज्यदायिका।।

तपस्विमानसाराध्या तपस्विमानदायिका।

तपस्वितापसंहर्त्री तपस्वितापशान्तिकृत्।।

तपस्विसिद्धिविद्या च तपस्विमंत्रसिद्धिकृत्।

तपस्विमंत्रतंत्रेशी तपस्विमंत्ररूपिणी।।

तपस्विमंत्रनिपुणा तपस्विकर्मकारिणी।

तपस्विकर्मसम्भूता तपस्विकर्मसाक्षिणी।।

तपस्सेव्या तपोभव्या तपोभाव्या तपस्विनी।

तपोवश्या तपोगम्या तपोगेहनिवासिनी।।

तपोधन्या तपोमान्या तपःकन्या तपोवृता।

तपस्तथ्या तपोगोप्या तपोजप्या तपोनृता।।

तपःसाध्या तपोराध्या तपोवन्द्या तपोमयी।

तपस्संध्या तपोवन्ध्या तपस्सान्निध्यकारिणी।।



Shri Raj verma ji
09897507933, 07500292413

तपोध्येया तपोज्ञेया तपस्तप्ता तपोबला।

तपोलेया तपोदेया तपस्तत्त्वफलप्रदा।।

तपोविघ्नवरघ्नी च तपोविघ्नविनाशिनी।

तपोविघ्नचयध्वंशी तपोविघ्नभयंकरी।।

तपोभूमिवरप्राणा तपोभूमिपतिस्तुता।

तपोभूमिपतिध्येया तपोभूमिपतीष्टदा।।

तपोवनकुरंगस्था तपोवनविनाशिनी।

तपोवनगतिप्रीता तपोवनविहारिणी।।

तपोवनफलासक्ता तपोवनफलप्रदा।

तपोवनसुसाध्या च तपोवनसुसिद्धिदा।।

तपोवनसुसेव्या च तपोवननिवासिनी।

तपोधनसुसंसेव्या तपोधनसुसाधिता।।

तपोधनसुसंलीना तपोधनमनोमयी।

तपोधननमस्कारा तपोधनविमुक्तिदा।।

तपोधनधनासाध्या तपोधनधनात्मिका।

तपोधनधनाराध्या तपोधनफलप्रदा।।



Shri Raj verma ji
09897507933, 07500292413

तपोधनधनाढ्या च तपोधनधनेश्वरी।

तपोधनधनप्रीता तपोधनधनालया।।

तपोधनजनाकीर्णा तपोधनजनाश्रया।

तपोधनजनाराध्या तपोधनजनप्रसूः।।

तपोधनजनप्राणा तपोधनजनेष्टदा।

तपोधनजनासाध्या तपोधनजनेश्वरी।।

तरुणासृक्प्रपानार्ता तरुणासृक्प्रतर्पिता।

तरुणासृक्समुद्रस्था तरुणासृक्प्रहर्षदा।।

तरुणासृक्सुसंतुष्टा तरुणासृग्विलेपिता।

तरुणासृङ्नदीप्राणा तरुणासृग्विभूषणा।।

तरुणैणबलिप्रीता तरुणैणबलिप्रिया।

तरुणैणबलिप्राणा तरुणैणबलीष्टदा।।

तरुणाजबलिप्रीता तरुणाजबलिप्रिया।

तरुणाजबलिघ्राणा तरुणाजबलिप्रभुक्।।

तरुणादित्यसंकाशा तरुणादित्यविग्रहा।

तरुणादित्यरुचिरा तरुणादित्यनिर्मला।।



Shri Raj verma ji
09897507933, 07500292413

तरुणादित्यनिलया तरुणादित्यमण्डला।

तरुणादित्यललिता तरुणादित्यकुण्डला।।

तरुणार्कसमज्योत्स्ना तरुणार्कसमप्रभा।

तरुणार्कप्रतीकाशा तरुणार्कप्रवर्द्धिता।।

तरुणारुणनेत्रा च तरुणारुणलोचना।

तरुणारुणगात्रा च तरुणारुणभूषणा।।

तरुणीदत्तसंकेता तरुणीदत्तभूषणा।

तरुणीगणसंतुष्टा तरुणी तरुणीमणिः।।

तरुणीमणिसंसेव्या तरुणीमणिवंदिता।

तरुणीमणिसंतुष्टा तरुणीमणिपूजिता।।

तरुणीवृन्दसंवन्द्या तरुणीवृन्दवन्दिता।

तरुणीवृन्दसंस्तुत्या तरुणीवृन्दमानदा।।

तरुणीवृन्दमध्यस्था तरुणीवृन्दवेष्टिता।

तरुणीवृन्दसम्प्रीता तरुणीवृन्दभूषिता।।

तरुणीजयसंसिद्धा तरुणीजयमोक्षदा।

तरुणीपूजकासक्ता तरुणीपूजकार्थिनी।।



Shri Raj verma ji
09897507933, 07500292413

तरुणीपूजकश्रीदा तरुणीपूजकार्तिहा।

तरुणीपूजकप्राणा तरुणीनिन्दकार्त्तिदा।।

तरुणीकोटिनिलया तरुणीकोटिविग्रहा।

तरुणीकोटिमध्यस्था तरुणीकोटिवेष्टिता।।

तरुणीकोटिदुःसाध्या तरुणीकोटिविग्रहा।

तरुणीकोटिरुचिरा तरुणी तरुणीश्वरी।।

तरुणीमणिहाराढ्या तरुणीमणिकुण्डला।

तरुणीमणिसन्हृष्टा तरुणीमणिमण्डिता।।

तरुणीसरणिप्रीता तरुणीसरणीरता।

तरुणीसरणिस्थाना तरुणीसरणीमता।।

तरणीमण्डलश्रीदा तरणीमण्डलेश्वरी।

तरणीमण्डलश्रद्धा तरणीमण्डलस्थिता।।

तरणीमण्डलार्घ्याढ्या तरणीमण्डलार्चिता।

तरणीमण्डलध्येया तरणीभवसागरा।।

तरणीकरणासक्ता तरणीतक्षकार्चिता।

तरणीतक्षकश्रीदा तरणीतक्षकार्थिनी।।



Shri Raj verma ji
09897507933, 07500292413

तरीतरणशीला च तरीतरणतारिणी।

तरीतरणसम्वेद्या तरीतरणकारिणी।।

तरुरुपा तरुरूपस्था तरुस्तरुलतामयी।

तरुरूपा तरुस्था च तरुमध्यनिवासिनी।।

तप्तकांचनगेहस्था तप्तकांचनभूमिका।

तप्तकांचनप्रकारा तप्तकांचनपादुका।।

तप्तकांचनदीप्तांगी तप्तकांचनसन्निभा।

तप्तकांचनगौरांगी तप्तकांचनमंचगा।।

तप्तकांचनवस्त्राढ्या तप्तकांचनरूपिणी।

तप्तकांचनमध्यस्था तप्तकांचनकारिणी।।

तप्तकांचनमासार्च्या तप्तकांचनपात्रभुक्।

तप्तकांचनशैलस्था तप्तकांचनकुण्डला।।

तप्तकांचनक्षेत्राढ्या तप्तकांचनदण्डधृक्।

तप्तकांचनभूषाढ्या तप्तकांचनदानदा।।

तप्तकांचनदेशेशी तप्तकांचनचापधृक्।

तप्तकांचनतृणाढ्या तप्तकांचनबाणभृत्।।



Shri Raj verma ji
09897507933, 07500292413

तलातलविधात्री च तलातलविधायिनी।

तलातलस्वरूपेशी तलातलविहारिणी।।

तलातलजनासाध्या तलातलजनेश्वरी।

तलातलजनाराध्या तलातलजनार्थदा।।

तलातलजयाभाक्षी तलातलजचंचला।

तलातलजरत्नाढ्या तलातलजदेवता।।

तटिनीस्थानरसिका तटिनी तटवासिनी।

तटिनी तटिनीतरिगामिनी तटिनीप्रिया।।

तटिनीप्लवनप्रीता तटिनीप्लवनोद्यता।

तटिनीप्लवनश्लाघ्या तटिनीप्लवनार्थदा।।

तटलास्या तटस्थाना तटेशी तटवासिनी।

तटपूज्या तटाराध्या तटरोममुखार्थिनी।।

तटजा तटरूपा च तटस्था तटचंचला।

तटसन्निधिगेहस्था सहितातटशायिनी।।

तरंगिणी तरंगाभा तरंगायतलोचना।

तरंगसमदुर्द्धर्षा तरंगसमचंचला।।



Shri Raj verma ji
09897507933, 07500292413

तरंगसमदीर्घांगी तरंगसमवर्द्धिता।

तरंगसम सम्वृद्धिस्तरंगसमनिर्मला।।

तडागमध्यनिलया तडागमध्यसम्भवा।

तडागरचनश्लाघ्या तडागरचनोद्यता।।

तडागकुमुदामोदी तडागेशी तडागिनी।

तडागनीरसंस्नाता तडागनीरनिर्मला।।

तडागकमलागारा तडागकमलालया।

तडागकमलान्तस्था तडागकमलोद्यता।।

तडागकमलांगी च तडागकमलानना।

तडागकमलप्राणा तडागकमलेक्षणा।।

तडागरक्तपद्मास्था तडागश्वेतपद्मगा।

तडागनीलपद्माभा तडागनीलपद्मभृत्।।

तनुस्तनुगता तन्वी तन्वंगी तनुधारिणी।

तनुरूपा तनुगता तनुधृक्तनुरूपिणी।।

तनुस्था तनुमध्यांगी तनुकृत्तनुमंगला।



Shri Raj verma ji
09897507933, 07500292413

तनुसेव्या तु तनुजा तनुजा तनुसम्भवा।।

तनुभृत्तनु सम्भूता तनुदा तनुकारिणी।

तनुभृत्तनु संहन्त्री तनुसंचारकारिणी।।

तथ्यवाक् तथ्यवचना तनुकृत्तथ्यवादिनी।

तथ्यभृत्तथ्यचरिता तथ्यधर्मानुवर्तिनी।।

तथ्यभुक्तथ्यगमना तथ्यभक्तिवरप्रदा।

तथ्यनीचेश्वरी तथ्यचित्ताचारासुसिद्धिदा।।

तर्क्यातर्क्यस्वभावा च तर्कदा या तु तर्ककृत्।

तर्काध्यापनमध्यस्था तर्काध्यापनकारिणी।।

तर्काध्यापनसंतुष्टा तर्काध्यापनरूपिणी।

तर्काध्यापनसंशीला तर्कार्थप्रतिपादिता।।

तर्काध्यापनसंतृप्ता तर्कार्थप्रतिपादिका।

तर्कवादाश्रितपदा तर्कवादविवर्द्धिनी।।

तर्कवादैकनिपुणा तर्कवादप्रचारिणी।

तमालदलश्यामांगी तमालदलमालिनी।।

तमालवनसंकेता तमालपुष्पपूजिता।



Shri Raj verma ji
09897507933, 07500292413

तगरीतगराराद्ध्या तगरार्चितपादुका।।

तगरस्रक्सुसंतुष्टा तगरस्रग्विराजिता।

तगराहुतिसंतुष्टा तगराहुतिकीर्तिदा।।

तगराहुतिसंसिद्धा तगराहुतिमानदा।

तडित्तडिल्लताकारा तडिच्चंचललोचना।।

तडिल्लता तडित्तन्वी तडिद्दीप्ता तडित्प्रभा।

तद्रूपा तत्स्वरूपेशी तन्मयी तत्त्वस्वरूपिणी।।

तत्स्थानदाननिरता तत्कर्मफलदायिनी।

तत्त्वकृत्तत्त्वदा तत्त्वा तत्त्ववित्तत्त्वतर्पिता।।

तत्त्वार्च्या तत्त्वपूज्या च तत्त्वार्घ्या तत्त्वरूपिणी।

तत्त्वज्ञानप्रदानेशी तत्त्वज्ञानसुमोक्षदा।।

त्वरितात्वरितप्रीता त्वरितार्त्तिविनाशिनी।

त्वरितासवसंतुष्टा त्वरितासवतर्पिता।।

त्वग्वस्त्रा त्वग्परीधाना तरला तरलेक्षणा।

तरक्षुचर्मवसना तरक्षुत्वग्निभूषणा।।

तरक्षुस्तरक्षुप्राणा तरक्षुपृष्ठगामिनी।



Shri Raj verma ji
09897507933, 07500292413

तरक्षुपृष्ठसंस्थाना तरक्षुपृष्ठवासिनी।।
तर्पितोदैस्तर्पणाशा तर्पणासक्तमानसा।

तर्पणानन्दहृदया तर्पणाधिपतिस्तुतिः।।

त्रयीमयी त्रयीसेव्या त्रयीपूज्या त्रयीकथा।

त्रयीभव्या त्रयीभाव्या त्रयीहव्या त्रयीयुता।।

त्र्यक्षरी त्र्यक्षरेशानी त्र्यक्षरीशीघ्रसिद्धिदा।

त्र्यक्षरेशी त्र्यक्षरीस्था त्र्यक्षरीपुरुषास्पदा।।

तपता तपनेष्टा च तपस्तपनकन्यका।

तपनांशु समासह्या तपनकोटिकांतिकृत्।।
तपनीया तल्पगता तल्पातल्पविधायिनी।

तल्पकृत्तल्पगा तल्पदात्री तल्पतलाश्रया।।

तपनीय तलारात्री तपनीयांशुप्रार्थिनी।

तपनीयप्रदा तप्ता तपनीयाद्रिसंस्थिता।।

तल्पेशी तल्पदा तल्पसंस्थिता तल्पवल्लभा।

तल्पप्रिया तल्परता तल्पनिर्माणकारिणी।।

तरसापूजनासक्ता तरसावरदायिनी।



Shri Raj verma ji
09897507933, 07500292413

तरसासिद्धिसंधात्री तरसामोक्षदायिनी।।

तापसी तापसाराध्या तापसार्तिविनाशिनी।

तापसार्ता तापसश्रीस्तापसप्रियवादिनी।।

तापसानन्दहृदया तापसानन्ददायिनी।

तापसाश्रितपादाब्जा तापसासक्तमानसा।।

तामसी तामसीपूज्या तामसीप्रणयोत्सुका।

तामसी तामसीप्रीता तामसीशीघ्रसिद्धिदा।।

तालेशी तालभुक्तालदात्री तालोपमस्तनी।

तालवृक्षस्थिता तालवृक्षजा तालरूपिणी।।

तार्क्ष्या तार्क्ष्यसमारूढा तार्क्ष्येशी तार्क्ष्यपूजिता।

तार्क्ष्येश्वरी तार्क्ष्यमाता तार्क्ष्येश्वरीवरदायिनी।।

तापी तु तापिनी तापसंहन्त्री तापनाशिनी।

तापदात्री तापकर्त्री तापविध्वंसकारिणी।।

त्रासकर्त्री त्रासदात्री त्रासहर्त्री च त्रासहा।

त्रासिता त्रासरहिता त्रासनिर्मूलकारिणी।।

त्राणकृत् त्राणसंशीला तानेशी तानदायिनी।



Shri Raj verma ji
09897507933, 07500292413

तानगानरता तानकारिणी तानगायिनी।।

तारुण्यामृतसम्पूर्णा तारुण्यामृतवारिधिः।

तारुण्यामृतसंतुष्टा तारुण्यामृततर्पिता।।

तारुण्यामृतपूर्णांगी तारुण्यामृतविग्रहा।

तारुण्यगुणसम्पन्ना तारुण्योक्तिविशारदा।।

ताम्बूली ताम्बूलेशानी ताम्बूलचर्वणोद्यता।

ताम्बूलपूरितास्या च ताम्बूलरुणिताधरा।।

ताटंकरत्नविख्याति स्ताटंकरत्नभूषिणी।

ताटंकरत्नमध्यस्था ताटंकद्वयभूषिता।।

तिथीशा तिथिसम्पूज्या तिथिस्था तिथिरूपिणी।

तिथित्रितयवास्तव्या तिथिवरदायिनी।।

तिलोत्तमादिकाराध्या तिलोत्तमादिकप्रभा।

तिलोत्तमा तिलप्रेक्ष्या तिलाराध्या तिलार्चिता।।

तिलभुक् तिलसंदात्री तिलतुष्टा तिलालया।

तिलदा तिलसंकाशा तिलतैलविधायिनी।।



Shri Raj verma ji
09897507933, 07500292413

तिलतैलोपलिप्तांगी तिलतैलसुगन्धिनी।

तिलाज्यहोमसंतुष्टा तिलाज्यहोमसिद्धिदा।।

तिलपुष्पांजलिप्रीता तिलपुष्पांजलिप्रिया।

तिलपुष्पांजलिश्रेष्ठा तिलपुष्पाघनाशिनी।।

तिलकाश्रितसिन्दूरा तिलकांकितचंदना।

तिलकाहृतकस्तूरी तिलकामोदमोहिनी।।

त्रिगुणा त्रिगुणाकारा त्रिगुणान्वितविग्रहा।

त्रिगुणाकारविख्याता त्रिमूर्तिस्त्रिगुणात्मिका।।

त्रिशिरा त्रिपुरेशानी त्रिपुरा त्रिपुरेश्वरी।

त्रिपुरेशी त्रिलोकस्था त्रिपुरी त्रिपुराम्बिका।।

त्रिपुरारिसमाराध्या त्रिपुरारिवरप्रदा।

त्रिपुरारिशिरोभूषा त्रिपुरारिसुखप्रदा।।

त्रिपुरारीष्टसन्दात्री त्रिपुरारीष्टदेवता।

त्रिपुरारिकृताद्धांगी त्रिपुरारिविलासिनी।।

त्रिपुरासुरसंहर्त्री त्रिपुरासुरमर्द्दिनी।



Shri Raj verma ji
09897507933, 07500292413

त्रिपुरासुरसंसेव्या त्रिपुरासुरवर्य्यपा।।

त्रिकूटा त्रिकूटाराध्या त्रिकूटार्चितविग्रहा।

त्रिकूटाचलमध्यस्था त्रिकूटाचलवासिनी।।

त्रिकूटाचलसंजाता त्रिकूटाचलनिर्गता।

त्रिकूटात्रिजटेशानी त्रिजटावरदायिनी।।

त्रिनेत्रेशी त्रिनेत्रा च त्रिनेत्रवरवर्णिनी।

त्रिवली त्रिवलीयुक्ता त्रिशूलवरधारिणी।।

त्रिशूलेशी त्रिशूलीशी त्रिशूलभृत्त्रिशूलिनी।

त्रिमनुस्त्रिमनूपास्या त्रिमनुपासकेश्वरी।।

त्रिमनुजपसंतुष्टा त्रिमनुस्तूर्णसिद्धिदा।

त्रिमनुपूजनप्रीता त्रिमनुध्यानमोक्षदा।।

त्रिविधा त्रिविधाभक्तिस्त्रिमता त्रिमतेश्वरी।

त्रिभावस्था त्रिभावेशी त्रिभावपरिपूरिता।।

त्रितत्त्वात्मा त्रितत्त्वेशी त्रितत्त्वज्ञा त्रितत्त्वधृक्।

त्रितत्त्वाचमनप्रीता त्रितत्त्वाचमनेष्टदा।।

त्रिकोणस्था त्रिकोणेशी त्रिकोणचक्रवासिनी।



Shri Raj verma ji
09897507933, 07500292413

त्रिकोणचक्रमध्यस्था त्रिकोणबिन्दुरूपिणी।।

त्रिकोणयंत्रसंस्थाना त्रिकोणयंत्ररूपिणी।

त्रिकोणयंत्रसम्पूज्या त्रिकोणयंत्रसिद्धिदा।।

त्रिवर्णाढ्या त्रिवर्णेशी त्रिवर्णोपास्यरूपिणी।

त्रिवर्णस्था त्रिवर्णाढ्या त्रिवर्णावरदायिनी।।

त्रिवर्णाद्या त्रिवर्णार्च्या त्रिवर्गफलदायिनी।

त्रिवर्गाढ्या त्रिवर्गेशी त्रिवर्गाद्यफलप्रदा।।

त्रिसंध्यार्च्या त्रिसंध्येशी त्रिसंध्याराधनेष्टदा।

त्रिसंध्यार्चनसंतुष्टा त्रिसंध्याजपमोक्षदा।।

त्रिपदाराधितपदा त्रिपदा त्रिपदेश्वरी।

त्रिपदाप्रदिपाद्येशी त्रिपदाप्रतिपादिका।।

त्रिशक्तिश्च त्रिशक्तिशी त्रिशक्तेष्टफलप्रदा।

त्रिशक्तेष्टा त्रिशक्तिष्टा त्रिशक्तिपरिवेष्टिता।।

त्रिवेणी च त्रिवेणीस्त्री त्रिवेणीमाधवार्चिता।

त्रिवेणीजलसंतुष्टा त्रिवेणीस्नानपुण्यदा।।

त्रिवेणीजलसंस्नाता त्रिवेणीजलरूपिणी।



Shri Raj verma ji
09897507933, 07500292413

त्रिवेणीजलपूतांगी त्रिवेणीजलपूजिता।।

त्रिनाडीस्था त्रिनाडीशी त्रिनाडीमध्यगामिनी।

त्रिनाडीसंध्यसंछेद्या त्रिनाडी च त्रिकोटिनी।।

त्रिपंचाशत्त्रिरेखा च त्रिशक्तिपथगामिनी।

त्रिपथस्था त्रिलोकेशी त्रिकोटिकुलमोक्षदा।।

त्रिरामेशी त्रिरामार्च्या त्रिरामवरदायिनी।

त्रिदशाश्रितपादाब्जा त्रिदशालपचंचला।।

त्रिदशा त्रिदशप्रार्थ्या त्रिदशाशुवरप्रदा।

त्रिदशैश्वर्यसम्पन्ना त्रिदशेश्वरसेविता।।

त्रियमार्च्या त्रियामेशी त्रियामानन्तसिद्धिदा।

त्रियामेशाधिकज्योत्स्ना त्रियामेशाधिकानना।।

त्रियामानाथवत्सौम्या त्रियामानाथभूषणा।

त्रियामानाथलावण्या रत्नकोटियुतानना।।

त्रिकालस्था त्रिकालज्ञा त्रिकालज्ञत्वकारिणी।

त्रिकालेशी त्रिकालार्च्या त्रिकालज्ञत्वदायिनी।।

तीरभुक्तिरगा तीरसरिता तारवासिनी।



Shri Raj verma ji
09897507933, 07500292413

तीरभुग्देशसंजाता तीरभुग्देशेसंस्थिता।।

तिग्मा तिग्मांशुसंकाशा तिग्मांशुक्रोडसंस्थिता।

तिग्मांशुकोटिदीप्तांगी तिग्मांशुकोटिविग्रहा।।

तीक्ष्णा तीक्ष्णतरा तीक्ष्णमहिषासुरमर्दिनी।

तीक्ष्णकर्त्री लसत्पाणिस्तीक्ष्णासि वरधारिणी।।

तीव्रा तीव्रगतिस्तीव्रा सुरसंघविनाशिनी।

तीव्राष्टनागाभरणा तीव्रमुण्डविभूषणा।।

तीर्थात्मिका तीर्थमयी तीर्थेशी तीर्थपूजिता।

तीर्थराजेश्वरी तीर्थफलदा तीर्थदानदा।।

तुमुली तुमुलप्राज्ञी तुमुलासुरघातिनी।

तुमुलक्षतजप्रीता तुमुलांगणनर्तकी।।

तुरगी तुरगारूढा तुरंगपृष्ठगामिनी।

तुरंगगमनाह्लादा तुरंगवेगगामिनी।।

तुरीया तुलना तुल्या तुल्यवृत्तिस्तु तुल्यकृत्।

तुलनेशी तुलाराज्ञी तुलाराज्ञीत्व सूक्ष्मवित्।।

तुम्बिका तुम्बिकापात्रभोजना तुम्बिकार्थिनी।



Shri Raj verma ji
09897507933, 07500292413

तुलसी तुलसीवर्य्या तुलजा तुलजेश्वरी।।

तुषाग्निव्रतसंतुष्टा तुषाग्निस्तुषराशिकृत्।

तुषारकर शीतांगी तुषारकरपूर्तिकृत्।।

तुषाराद्रिस्तुषाराद्रिसुता तुहिनदीधितः।

तुहिनाचलकन्या च तुहिनाचलवासिनी।।

तुर्यवर्गेश्वरी तुर्यवर्गदा तुर्य्यवेददा।

तुर्यवर्यात्मिका तुर्यतुर्येश्वरस्वरूपिणी।।

तुष्टिदा तुष्टिकृत्तुष्टिस्तूणीरद्वयपृष्ठधृक्।

तुम्बुराज्ञानसंतुष्टा तुष्टसंसिद्धिदायिनी।।

तूर्णराज्यप्रदा तूर्णगद्गदा तूर्णपद्यदा।

तूर्णपाण्डित्यसंदात्री तूर्णपूर्णबलप्रदा।।

तृतीया च तृतीयेशी तृतीयातिथिपूजिता।

तृतीयाचन्द्रचूडेशी तृतीयाचन्द्रभूषणा।।

तृप्तिस्तृप्तिकरी तृप्ता तृष्णा तृष्णाविवर्द्धिनी।

तृष्णापूर्णकरी तृष्णानाशिनी तृषिता तृषा।।

त्रेतासंसाधिता त्रेता त्रेतायुगफलप्रदा।



Shri Raj verma ji
09897507933, 07500292413

त्रैलोक्यपूज्या त्रैलोक्यदात्री त्रैलोक्यसिद्धिदा।।

त्रैलोक्यश्वरतादात्री त्रैलोक्यपरमेश्वरी।

त्रैलोक्यमोहनेशानी त्रैलोक्यराज्यदायिनी।।

तैत्रिशाखेश्वरी तैत्रिशाखा तैत्रिविवेकदा।

तोरणान्वितगेहस्था तोरणासक्तमानसा।।

तोलकास्वर्णसंदात्री तोलकास्वर्णकंकणा।

तोमरायुधरूपा च तोमरायुधधारिणी।।

तौर्य्यात्रिकेश्वरी तौर्यत्रिकी तौर्य्यत्रिकोत्सुकी।

तंत्रकृत्तंत्रवत्सूक्ष्मा तंत्रमंत्रस्वरूपिणी।।

तंत्रकृत्तंत्रसम्पूज्या तंत्रेशी तंत्रसम्मता।

तंत्रज्ञा तंत्रवित्तन्त्रसाध्या तंत्रस्वरूपिणी।।

तंत्रस्था तंत्रजा तंत्री तंत्रभृत्तंत्रमंत्रदा।

तंत्राद्या तंत्रगा तंत्रा तंत्रार्च्या तंत्रसिद्धिदा।।

## फलश्रुति-

इति ते कथितं दिव्यं क्रतुकोटिफलप्रदम्।

नाम्नां सहस्त्रं तारायास्तकाराद्यं सुगोपितम्।।



Shri Raj verma ji
09897507933, 07500292413

दानं यज्ञस्तपस्तीर्थं व्रतं चानशनादिकम्।

एकैक नाम सम्पुण्यं संध्यासुगदितं मया।।

गुरौ देवे तथा मंत्रे यस्य स्यान्निश्चला मतिः।

तस्यैव स्तोत्रपाठेऽस्मिन्सम्भवेदधिकारिता।।

महाचीन क्रमाभिन्न षोढान्यस्त कलेवरः।

क्रमदीक्षान्वितो मंत्री पठेदेतन्नचान्यथा।।

गंधपुष्पादिभिर्द्रव्यैर्मकारैः पंचभिर्द्विजः।

सम्पूज्य तारां विधिवत्पठेदेतनन्यधीः।।

अष्टम्यां च चतुर्दश्यां संक्रान्तौ रविवासरे।

शनिभौमदिने रात्रौ ग्रहणे चन्द्रसूर्ययोः।।

तारारात्रौ कालरात्रौ मोहरात्रौ विशेषतः।

पठनान्मंत्रसिद्धिः स्यात्सर्वज्ञत्वं प्रजायते।।

श्मशाने प्रान्तरे रम्ये शून्यागरे विशेषतः।

देवागारे गिरौ वापि स्तवपारायणं चरेत्।।

ब्रह्महत्या सुरापानं स्तेयं स्त्रीगमनादिकम्।



Shri Raj verma ji
09897507933, 07500292413

गुरुतल्पे तथा चान्यत्पातकन्नश्यति ध्रुवम्।।

लतामध्यगतो मंत्री श्रद्धया चार्चयेद्यदि।

आकर्षयेत्तदा रम्भां मेनामपि तथोर्वशीम्।।

संग्रामसमये वीरस्तारा साम्राज्य कीर्त्तनात्।

चतुरंगचयं जित्वा सर्वसाम्राज्य भाग्भवेत्।।

निशार्द्धे पूजनान्ते च प्रतिनाम्ना प्रपूजयेत्।

एकैक करवीराद्यैर्मन्दारैर्नीलवारिजैः।।

गद्यपद्यमयी वाणी भूभोज्या च प्रवर्तते।

पाण्डित्यं सर्वशास्त्रेषु वादी त्रस्यति दर्शनात्।।

वह्नि जायान्तकैरेतैस्ताराद्यैः प्रतिनामभिः।

राजन्यं सर्वराजेषु परकाय प्रवेशनम्।।

अन्तर्धानं खेचरत्वं बहुकायप्रकाशनम्।

गुटिका पादुका पद्मावती मधुमती तथा।

रसं रसायनाः सर्वाः सिद्धयः समुपस्थिताः।

कर्पूरागरु कस्तूरीचन्दनैः संयुतैर्जलैः।।

मूलसम्पुटिते नैव प्रतिनाम्ना प्रपूजयेत्।



Shri Raj verma ji
09897507933, 07500292413

यक्षराक्षस गन्धर्व विद्याधर महोरगाः।।

भूतप्रेत पिशाचाद्या डाकिनी शाकिनीगणाः।

दुष्टभैरववेतालाः कूष्माण्डाः किन्नरीगणाः।।

भयभीताः पलायन्ते तेजसा साधकस्य च।

मंत्रज्ञाने समुत्पन्ने प्रतिनाम्ना विचारयेत्।।

मंत्रसम्पुटिते नैव तस्य शांतिर्भवेद् ध्रुवम्।

ललना वशमायान्ति दासतां यान्ति पार्थिवाः।।

अग्नयः शीततां यान्ति जापकस्य च भाषणात्।

एकावर्तन मात्रेण राजभीति निवारणम्।।

वेलावर्तन मात्रेण पशुवृद्धिः प्रजायते।

दशावृत्त्या धनप्राप्तिर्विंशत्या राज्यमाप्नुयात्।।

शतावृत्त्या गृहे तस्य चंचला निश्चला भवेत्।

गंगाप्रवाहवद्वाणी प्रलापादपि जायते।।

पुत्र पौत्रान्वितो मंत्री चिरंजीवी तु देववत्।

शतद्वया वर्त्तनेन देववत्पूज्यते जनैः।।



Shri Raj verma ji
09897507933, 07500292413

शतपंचकमावर्त्य स भवेद् भैरवोपमः।

सहस्रावर्तने नैव मंत्रस्तस्य स्वसिद्धिदः।।

तस्मिन्प्रवर्त्तते सर्वसिद्धिः सर्वार्थ साधिनी।

पादुकांजन वेताल पाताल गमनादिकम्।।

विविधा यक्षिणीसिद्धिर्वाक्सिद्धि स्तस्य जायते।

शोषणं सागराणां च धरायां भ्रमणं तथा।।

नवीनसृष्टि निर्माणं सर्वं कर्तुं क्षमो भवेत्।

अयुतावर्तने नैव तारां पश्यति चक्षुषा।।

लक्षावर्तन मात्रेण तारापति समो भवेत्।

न किंचिद् दुर्लभं तस्य जीवन्मुक्तो हि भूतले।।

कल्पान्ते न तु तत्पश्चात्तारा सायुज्यमाप्नुयात्।

यद्धि तारा समा विद्या नास्ति तारुण्यरूपिणी।।

न चैतत्सदृशं स्तोत्रं भवेद् ब्रह्माण्ड मण्डले।

वक्त्रकोटि सहस्रैस्तु जिह्वाकोटि शतैरपि।।

न शक्यते फलं वक्तुं मया कल्पशतैरपि।



Shri Raj verma ji
09897507933, 07500292413

चुम्बके निन्दके दुष्टे पिशुने जीवहिंसके।।

सगोप्यं स्तोत्र मे तत्तद्दर्शनेनैव कुत्रचित्।

राज्यं देयं धनं देयं शिरो देयमथापिवा।।

न देयं स्तोत्र वर्य्यं तु मंत्रादपि महोद्यतम्।

अनुलोम विलोमाभ्यां मूल सम्पुटितं त्विदम्।।

लिखित्वा भूर्जपत्रादौ गंधाष्टक पुरस्सरैः।

धारयेद्दक्षिणे बाहौ कण्ठे वामभुजे तथा।।

तस्य सर्वार्थसिद्धिः स्याद्वह्निा नैव दह्यते।

तद्गात्रं शस्त्र संघैश्च भिद्यते न कदाचन्।।

स भूमि वलये पुत्र विचरेद्भैरवोपमः।

बंध्यापि लभते पुत्रं निर्धनो धनमाप्नुयात्।।

निर्विघ्नो लभते विद्यां तर्कव्याकरणादिकाम्।।

इति निगदितमस्यास्तादि नाम्नां सहस्रं वरदमनु निधानं दिव्यसाम्राज्य संज्ञम्।

विधिहरि गिरिशादौ शक्तिदानैकदक्षं समविधि पठनीयं कालितारा समज्ञैः।।



Shri Raj verma ji
09897507933, 07500292413

## Books Written by Gurudev Shri Raj Verma ji

- Divya Mantra Sadhana Evam Siddhi




- Shri Baglamukhi Divya Sadhana






Shri Raj verma ji
09897507933, 07500292413